व्याकरण
1678

संस्कृत

क्र.नं. ८८

व्याकरण

॥ समासचक्रं ॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

1

॥इतिसमासचक्रप्रारंभः॥ छ॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

सं०च० १

श्रीगणेशायनमः ॥ बालबोधार्थंप्रयोगविधिःकथ्यते ॥ प्रयोगस्त्रिविधः ॥
कर्त्तरिप्रयोगकर्मणिप्रयोगभावेप्रयोगभेदेन ॥ सचकर्त्तरिप्रयोगः ॥ सक
र्मअकर्मभेदेनद्विविधः ॥ तत्रसकर्मकोयथा ॥ कृष्णोभक्तान्रक्षति ॥ अक
र्मकोयथा ॥ कृष्णस्तिष्टति ॥ कर्मणिप्रयोगोयथा ॥ विष्णुनाप्रपंचःक्रियते ॥ कृ
(2) ष्णेनस्थियते ॥ इतिप्रयोगविधिः ॥ अथसमासविधिःकथ्यते ॥ सचषड्विधःतत्पु
रुषःकर्मधारयोबहुव्रीहिर्द्विगुर्द्वंद्वोव्ययीभावश्चेति ॥ तत्राष्टधातत्पुरुषः ॥ प्र
थमातत्पुरुषोद्वितीयातत्पुरुषस्तृतीयातत्पुरुषश्चतुर्थस्तत्पुरुषःपंचमीत
त्पुरुषःषष्ठीतत्पुरुषःसप्तमीतत्पुरुषोनञ्तत्पुरुषश्चेतिप्रथमातत्पुरुषोयथा ॥
अर्धंपिपल्याःअर्धपिप्पली ॥ पुर्वःकायोयस्य — पुर्वःकायः ॥ द्वितीयातत्पुरुषो राम
यथा ॥ सुखंश्रितसुखःश्रितः ॥ ग्रामंश्रितोग्रामश्रितः ॥ तृतीयातत्पुरुषोयथा ॥ २

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the ... Pratishthan, Mumbai.

(2A)

शंकुलयाखण्डः शंकुलयाखंडः॥ धान्येनार्थो धान्यार्थः॥ चतुर्थीतत्पुरुषो यथा॥ यूपायदारु यूपदारु॥ ब्राह्मणायहितं ब्राह्मणहितं॥ पञ्चमीतत्पुरुषो यथा॥ अर्थादपेतो अर्थापेतः॥ स्करवादपेतः स्करवापेतः॥ षष्ठीतत्पुरुषो यथा॥ कृच्छस्य भक्तः कृच्छभक्तः॥ वृक्षस्य फलं वृक्षफलं॥ सप्तमी॰ यथा॥ अक्षेषु शौण्डः अक्षशौण्डः॥ नञ्॰ यथा॥ न ब्राह्मणाः अब्राह्मणाः॥ न वृषभः अवृषभः॥ इति तत्पुरुषः॥ अथ कर्मधारयः स यथा॥ विशेषण पूर्वपद विशेष्य पूर्वपद विशेषणोभयपद उपमानपूर्वपद उपमानोत्तरपद संभावना पूर्वपद अवधारण पूर्वपदभेदेन विशेषणपूर्वपदकर्मधारयो यथा॥ कृष्णश्चासौ सर्पश्च कृष्णसर्पः॥ नीलंच तत् उत्पलंच नीलोत्पलं॥ विशेष्यपूर्वपदकर्मधारयो यथा॥ वैय्याकरणश्चासौ खसूचिः वैयाकरणखसूचिः॥ विशेषणोभयपदो यथा॥ शीतंच तत् उष्णंच शीतो

(3)

सं०का० २ ॥ उपमानंपूर्वपदोयथा ॥ शंखवयेवपांडुः शंखपांडुः ॥ उपमानोत्तरपदोयथा
नरोयंसिंहइवनरसिंहः ॥ संभावनापूर्वपदोयथा ॥ गुणइतिबुद्धिःगुणबुद्धिः ॥
अवधारणापुर्वपदोयथा ॥ गुंणएवधनंगुणधनं ॥ मानएवधनमानधनं ॥ इ
तिकर्मधारयः ॥ अथबहुव्रीहिःसप्तधा ॥ द्वि दबहुपदसहपूर्वपदसंख्योत
रपदसंख्योभयपदव्यतिहारलक्षणादिगंतरालक्षणभेदात द्विपदबहुव्री
हिर्यथा ॥ चित्रागावोयस्यसः चित्रगुः ॥ लुप्तः ओदनःयेनसःभुक्तोदनः ॥
निर्जितकामोयेनसो निर्जितकामः ॥ विभक्तंधनंयैस्ते विभक्तधनाः ॥ भ्रातरः
दत्तसुपोयस्मैसः दत्तसुपः ॥ ब्राह्मणः उध्दृत ओदनोयस्मात उध्दृतो
दनं ॥ कुडंपुष्पिताःद्रुमाःयस्मिन ततपुष्पितद्रुमंवनंबहवोयज्वानोयस्यं राम २
साबहुयज्वा ॥ शाला ॥ धन्यजनाः ॥ येषुतेधन्यजनाः ॥ जनपदाः ॥ चक्रंपा

3A

णोयस्यसोच्चक्रपाणिः॥हरिः॥करेस्थितंधनंयस्यसः करधनः॥हरस्यमुखं
मिवमुखंयस्यसः हरमुखः॥उच्चैर्घटोयस्याःसा उच्चैर्घट्या॥नासिकागात्रोदरस्त
नकंठोष्ठदंतमुखाक्षिकेशा॥स्त्रियांबहुव्रीहौवाविकारांता भवंति॥यथा स्कंदरंअंगं
यस्याःसास्कंदरांगी॥शोभनंगात्रंयस्याःसासुगात्री॥शातमुदरंयस्याःसाशातो
दरी॥पीवरौस्तनौयस्याःसापीवरस्तनी॥कंबुरिवकंठोयस्याःसाकंठी॥बिंबव
दोष्ठोयस्याःसाबिंबोष्टी॥शोभनाःदंतायस्याःसासुदंती॥चंद्रवन्मुखंयस्याःसा
चंद्रमुखी॥इंदिरेइवअक्षिणीयस्याःसाइंदीवराक्षी॥कुटिलाःकेशान्यस्यःसाकु
टिलकेशी॥इतरेशामंगवाचकानांबहुव्रीहौस्त्रीत्वेअकांतत्वमेव॥यथाचारु
देहा॥निलालका॥रक्तकुच्या॥कुंददनेत्यादि॥गुरुलघुमृदुपटुऋजुस्वादुचारुस
शब्दानांस्त्रीलिंगविशेषणत्वेइकारांतत्वमेव॥यथामृद्विशाटीगुर्वीभार्या॥लघ्वी

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

सं॰च॰ भाषापृथ्वीशालेत्यादि ॥ इति द्विपद बहुव्रीहि बहुपदो यथा ॥ अधिकः उन्नता अं
३ अंसो यस्यासो अधिकोन्नतांसः सहपूर्वपदो यथा ॥ कछेन सह वर्त्तत इति सकछः ॥
भार्यया सह वर्तत इति सभार्यः ॥ संख्योत्तर पदो यथा ॥ दशानां समीपे ये सति ते उ
(५) पदेशाः ॥ संख्योभयपदो यथा द्वौ वा त्रयो वा द्वित्राः ॥ त्रयो वा चत्वारो वा त्रिचतुराः
व्यतिहार लक्षणो यथा ॥ केशेषु केशेषु गृहित्वा इदं युद्धं प्रवर्त्तते ॥ इति केशा
केशी युद्धं ॥ दंडैश्च दंडैश्च ——— यद् इदं युद्धं प्रवर्त्तत इति दंडादंडि युद्धं ॥ दिगंत
राल लक्षणो यथा ॥ दक्षिणस्याः पूर्वस्या दिशाः यदंतरालं दक्षिणापूर्वा ॥ द्वि श्च ७
गुरुः समासो द्विविधः ॥ एकवद्भावी अनेकवद्भावी चेति ॥ एकवद्भावी द्विगुर्यथा राम
त्रीणि शृंगाणि समाहृतानीति त्रिशृंगं ॥ अनेकवद्भावी यथा ॥ सप्त चेते ऋषय ३
श्च सप्तर्षयः ॥ अधिकश्चोच्यते ॥ संख्यापूर्वो द्विगुः ॥ यथा पंचानां पूला

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(5A)

नां समाहृतिः ॥ पंचपूली ॥ त्रयाणां वेदानां समाहरस्त्रिवेदी ॥ अकारांतोत्तर
पदो द्विगुरेव स्त्रियामन्यथा नपुंसकएव ॥ षण्णां कपीनां समाहारः षट्कपि ॥
चतसृणां अंगुलीनां समाहारश्चतुरंगुली ॥ त्रयाणां गुरूणां समाहारस्त्री
गुरू ॥ द्वंद्वोपि द्विविधः ॥ इतरेतर समाहारभेदात ॥ इतरेतरद्वंद्वो यथा ॥ प्ल
क्षश्च न्यग्रोधश्च प्लक्षन्यग्रोधौ ॥ रामश्च कृष्णश्च रामकृष्णौ ॥ लक्ष्मीनाराय
णश्च लक्ष्मीनारायणौ ॥ कुंदंच कोनदंच कुंदकोनदे ॥ बिसंच कुसुमंच बिसकु
सुमे ॥ समाहारद्वंद्वो यथा ॥ हरिश्च हरश्च गुरुश्च हरिहरगुरवः ॥ मार्दंगिक
श्च वैणविकाश्च मार्दंगिकवैणविकं ॥ द्वंद्वश्च ॥ प्राणितूर्य सेनांगानां ॥ एतेषां द्वं
द्वे एकवद्भावः ॥ प्राण्यंगे यथा ॥ पाणीच पादौच मुखंच पाणिपादमुखं ॥ कर्णौ
च नयने च कर्णनयनं ॥ तूर्यंगे यथा ॥ शंखश्च पटहश्च शंखपटहं ॥ सेनांगे यथा ॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

स०च० ४ राजन्याश्चरथाश्च अश्वाश्चराजन्यरथाश्वं ॥ अथव्ययीभावोपिद्विविधः ॥ वी
प्साविभक्तिभेदात ॥ वीप्साव्ययीभावोयथा ॥ तटंतटंप्रत्यनुतटं ॥ गिरिंगिरिंप्र
त्यनुगिरिं ॥ क्रममनतिक्रम्यवर्तमानंयथाक्रमं ॥ विभक्त्यव्ययीभावोयथा ॥
(5) कुंभस्यसमीपेवर्ततइतिउपकुंभं ॥ मद्राणांसमृद्धिः सुमद्रं ॥ मक्षिकाणामभावोनिर्मक्षिकं ॥ अव्ययीभावस्याव्ययत्वात ॥ त्रीषुलिंगेषुसमानरूपं ॥ तेन
तत्पुरुषश्चकर्मधारयोबहुव्रीहिर्द्विगुर्द्वंद्वोव्ययीभावश्चेति ॥ षडत्रनिर्णीताः ॥
अन्यश्चशेषः ॥ लुकसमासोलुकसमासश्चेति ॥ लुकसमासोयथा ॥ वनेचर
तीतिवनेचरः ॥ अलुकसमासोयथा ॥ कष्टंश्रितःकष्टश्रितः ॥ नित्यसमासो
यथा ॥ सहगच्छतीसहगः ॥ अनित्यसमासोयथा ॥ नरेःसहसागरंगच्छती सम ४
तीसमागरगः ॥ रूपकसमासोयथा ॥ तनुरेवलतातनुलता ॥ कृष्णएवमेघः

"Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(5A)

कृष्णमेघः ॥ बुद्धिरस्यास्तीति बुद्धिमती ॥ धनमासामस्तीति धनवत्यः ॥ पुत्राः
अस्याः संततिः पुत्रवती ॥ धनमस्यास्तीति धनिनी ॥ कुंडलमस्यास्तीति कुंड
ली ॥ देवदत्ताः ॥ धीरस्य भावो धीरता ॥ जनानां समूहो जनता ॥ घटस्य भावो
घटत्वमित्यादि ॥ वृक्षशाखातपुरुषः ॥ श्वेताश्वः ॥ कर्मधारयः ॥ वक्रवस्त्रो ब
हुव्रीहिर्द्वंद्वश्चंद्रदिवाकरौ ॥ इति समासविधिः ॥ अकर्मधातवस्तु ॥ वृद्धिक्षयभ
यजीवस्तुवितमरणं लज्जासत्तास्थिति जागरणं ॥ शयनक्रीडारुचिदीप्त्यर्थे धातुग
णं तमकर्मकमाहुः ॥१॥ सदृशं त्रिषु लिंगेषु सर्वासु च विभक्तिषु ॥ वचनेषु च स
र्वेषु यन्न व्येति तदव्ययं ॥२॥ विशेषणं पुरस्कृत्य विशेष्यं तदनंतरं ॥ कर्तृकर्म
क्रियायुक्तमेतदन्वयलक्षणं ॥३॥ क्रियाव्ययविशेषणानां क्लीबत्वमेकवचनां
तत्वं च वाच्यं ॥ अभेदे भेदकथनं भेदे सत्यभिदाभिधा ॥ अयोगे योगकथनं योगे च ॥

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

सं॰च॰ योगवर्तनं ॥४॥ ॥ ॥ ॥ ॥
५

(6)

॥इतिसमासचक्रसमाप्तः॥ ॥

राम

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

## मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com